

# ॥ श्रीविष्णु कवचं – योगनिद्रा – ब्रह्माण्ड पुराणम् ॥

## Sri Vishnu Kavacham – Yoganidra – Brahma Vaivarta Puranam

The following is a rare Kavacham (armor stuti) on on **Lord Vishnu** by **Lord Krishna** taken from **Brahma Vaivarta Puranam**, **Sri Krishna Janma Khanda**, and **Chapter 12** as told by **Yoganidra** to **Lord Brahma**.

The elaborate **Phalashruti** mentions that by reciting this hymn **Goddess Durga** was able to destroy **Shumbha** and **Raktabija** and **Lord Shiva** destroy **Tripura**. One who chants this hymn never gets afflicted by any fear – poison, fire, water, enemies, etc.

योगनिद्रोवाच –

श्रीहरिः पातु मे वक्त्रं मस्तकं मधुसूदनः ।
श्रीकृष्णचक्षुषी पातु नासिकां राधिकापतिः ॥ १ ॥

कर्ण-युग्मं च कण्ठं च कपालं पातु माधवः ।
कपोलं पातु गोविन्दः केशांश्च केशवः स्वयम् ॥ २ ॥

अधरोष्ठं हृषीकेशो दन्तपङ्क्तिं गदाग्रजः ।
रासेश्वरश्च रसनां तालुकं वामनो विभुः ॥ ३ ॥

वक्षः पातु मुकुन्दश्च जठरं पातु दैत्यहा ।
जनार्दनः पातु नाभिं च पातु विष्णुश्च मेहनम् ॥ ४ ॥

नितम्ब-युग्मं गुह्यं च पातु मे पुरुषोत्तमः ।
जानु-युग्मं जानकीशः पातु ते सर्वदा विभुः ॥ ५ ॥

हस्त-युग्मं नृसिंहश्च पातु सर्वत्र सङ्कटे ।
पाद-युग्मं वराहश्च पातु ते कमलोद्भवः ॥ ६ ॥

ऊर्ध्वं नारायणः पातु ह्यधस्तात् कमलापतिः ।
पूर्वस्यां पातु गोपालः पातु वह्नौ दशास्यहा ॥ ७ ॥

वनमाली पातु याम्यां च वैकुण्ठः पातु नैरृती ।
वारुण्यां वासुदेवश्च सतो रक्षाकरः स्वयम् ॥ ८ ॥

पातु ते सन्ततमजो वायव्यां विष्टरश्रवाः ।
उत्तरे च सदा पातु तेजसा जलजासनः ॥ ९ ॥

ऐशान्यां ईश्वरः पातु पातु सर्वत्र शत्रुजित् ।
जले स्थले चाऽन्तरिक्षे निद्रायां पातु राघवः ॥ १० ॥

## ॥ फलश्रुतिः ॥

इत्येवं कवचं ब्रह्मन् कवचं परमाद्भुतम् ।
कृष्णेन कृपया दत्तं स्मृतेनैव पुरा मया ॥ ११ ॥

शुम्भेन सह सङ्ग्रामे निर्लक्ष्ये घोर-दारुणे ।
गगने स्थितया सद्यः प्राप्ति मात्रेण स जितः ॥ १२ ॥

कवचस्य प्रभावेण धरण्यां पतितो मृतः ।
पूर्व वर्ष शतं खे च कृत्वा युद्धं भयावहम् ॥ १३ ॥

मृते शुम्भे च गोविन्दः कृपालुर् गगन-स्थितः ।
मालां च कवचं दत्त्वा गोलोकं स जगाम ह ॥ १४ ॥

कल्पान्तरस्य वृत्तान्तं कृपया कथितं मुने ।
अभ्यन्तर भयं नास्ति कवचस्य प्रभावतः ॥ १५ ॥

कोटिशः कोटिशो नष्टा मया दृष्टाश्च वेधसः ।
अहं च हरिणा सार्धं कल्पे कल्पे स्थिरा सदा ॥ १६ ॥

इत्युक्त्वा कवचं दत्त्वा सान्तर्धानं चकार ह ।
निःशङ्को नाभिकमले तस्थौ स कमलोद्भवः ॥ १७ ॥

सुवर्ण गुटिकायां च कृत्वेदं कवचं परम् ।
कण्ठे वा दक्षिणे बाहौ बध्नीयाद्यः सुधीः सदा ॥ १८ ॥

विषा ऽग्नि जल शत्रुभ्यो भय तस्य न जायते ।
जले स्थले चाऽन्तरिक्षे निद्रायां रक्षतीश्वरः ॥ १९ ॥

सङ्ग्रामे वज्रपाते च विपत्तौ प्राणसङ्कटे ।
कवच स्मरणाद् एव सद्यो निःशङ्कतां व्रजेत् ॥ २० ॥

बद्ध्वेदं कवचं कण्ठे शङ्करस् त्रिपुरं पुरः ।
जघान लीला मात्रेण दुरन्तमसुरेश्वरम् ॥ २१ ॥

बद्ध्वेदं कवचं काली रक्तबीजं चखाद सा ।
सहस्रशीर्षा धृत्वेदं विश्वं दत्ते तिलं यथा ॥ २२ ॥

आवां सनत्कुमारश्च धर्मसाक्षी च कर्मणाम् ।
कवचस्य प्रभावेण सर्वत्र जयिनो वयम् ॥ २३ ॥

तस्य नन्दशिशोः कण्ठे चकार कवचं द्विजः ।
आत्मनः कवचं कण्ठे दधार च स्वयं हरिः ॥ २४ ॥

प्रभावः कथितः सर्वः कवचस्य हरेस् तथा ।
अनन्तस्या ऽच्युतस्यैव प्रभावं अतुलं मुने ॥ २५ ॥

---

**॥ इति श्रीब्राह्मे वैवर्ते महापुराणे श्रीकृष्ण-जन्म-खण्डे योगनिद्रोवत श्रीविष्णु कवचं सम्पूर्णम् ॥**